International Journal of Multidisciplinary Horizon

ISSN:3049-2017
IJMH 2025; 2(2): 20-21
© 2025 IJMH
www.themultijournal.com
Received: 12-04-2025
Accepted: 17-04-2025
Publish : 18-04-2025

**जयपालः**
शोधछात्रः (सर्वदर्शनविभाग),
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालय, नवदेहली (110016)

**Correspondence:**
**जयपालः**
शोधछात्रः (सर्वदर्शनविभाग),
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालय, नवदेहली (110016)

# ईश्वरविषये निम्बार्कदर्शनस्य विमर्शः

**जयपालः**

भारतीयदर्शनेषु वैदिकावैदिकभेदेन द्वैविध्यं प्रसिद्धमेव तत्र वैदिकदर्शनानि न्याय-वैशेषिकदर्शने सांख्य-योगदर्शने पूर्वोक्तमीमांसादर्शनेति षट् दर्शनानि प्रसिद्धानि । तत्र निम्बार्कदर्शनं उत्तरमीमांसायाम् अन्तर्गतम् उत्तरमीमांसा दर्शनमेव वेदान्तदर्शनमिति अङ्गीक्रियते । यद्यपि वेदान्तो नाम उपनिषद् प्रमाणम् । परन्तु न केवलं उपनिषदाम् एव वेदान्ततत्वं तद् उपनिषदाधारेण लिखिताः ब्रह्मसूत्रग्रन्थाः गीतादिस्मृतिग्रन्थाश्च वेदान्त शब्देन व्यवह्रियन्ते । तत्र वेदान्त दर्शनस्य व्यासाचार्यैः उपनिषदां तात्पर्यनिर्णयार्थं ब्रह्मसूत्राणि लिखितानि । ब्रह्मसूत्रमेव वेदान्तशब्देन इदानीं विशेषतः प्रसिद्धिं भजते । तत्र व्यासाचार्याणां ब्रह्मसूत्राणां श्रीशङ्कराचार्य भगवतपादैः अद्वैतपरतया भाष्यं कृतमस्ति । एवं श्रीमद् रामानुजाचार्यैः विशिष्टाद्वैतपरतया भाष्यं कृतमस्ति । श्रीमध्वाचार्यैः द्वैतपरतया व्याख्यानं कृतमस्ति । एवमेव श्रीनिम्बकाचार्याः समतानुसारेण भेदाभेदवादम् आश्रित्य ब्रह्मसूत्राणां भाष्यं प्रणीतम् । तत्र निम्बार्क मते एकं चेतन तत्वं अन्यत् अचेतन तत्वम् इति प्राधान्येन भेदद्वयं कृतमस्ति । तत्र चेतनतत्वेपि जीवः एकं तत्वं ईश्वरः एकं तत्वं इति द्विविधं तत्वजातं निम्बार्कदर्शने स्वीक्रियते । इदानीम् अस्मिन् लेखे मया निम्बार्कदर्शने ईश्वरविषये किं वर्णितम् । तेषां मते ईश्वरस्य किं लक्षणम् अस्ति । तेषां मतस्य ईश्वरस्य किं वैशिष्ट्यं इति निरूपयामि ।

स्वभावतोऽपास्तसमस्तदोषम्, अशेषकल्याणगुणैकराशिम्।
व्यूहाङ्गिङ्गनं ब्रह्म परं वरेण्यम्, ध्यायेम कृष्णं कमलेक्षणं हरिम् ।।' इति। (दश श्लोकः -3)

अर्थात् परमात्मा तावत् स्वाभाविकेन रूपेण सतस्तैः दोषैः रहितो वर्तते। अर्थाज्जीवेन यदि स्वस्य सर्वेऽपि दोषाः क्षालनीयाः चेत् तस्य कृते बहुविधम् ज्यासनं विधातव्यं भवतीति ज्ञेयम्। परन्तु परमात्मनि तावद् एते दोषाः नैव आयान्ति। तथात्र तस्य परिहारस्य वार्त तु दूरतोऽपास्ता। तथा चेदं वक्तव्यं यत् परमात्मा तावत् स्वभाविकेन रूपेणैव समस्तैः दोषैः रहित एव वर्तते। तथा च परमात्मनस्तु स्वभावत एव सर्वेऽपि दोषाः दूरीभूता वर्तन्ते। तथा च द्वितीयं विशेषणम् 'अशेषकल्याणगुणैकभाजम्' इति। अर्थात् समस्ताः ये कल्याणगुणास्ते तमेवानुगता वर्तन्ते। तथा चाशेषैः कल्याणकारिभिः गुणैः परमात्मा विशिष्टो वर्तते। अनेन च परमात्मनि यदद्वैतिभिः औदासीन्यं निर्गुणत्वञ्च वर्ण्यते, तस्य निरासः कृतः। इतोऽपि विशेषणं 'व्यूहाङ्गिनम्' इति। इतोऽपि परं ब्रह्म इत्यपि प्रोक्तम्। इतोऽपि वरेण्यम्- वरणयोग्यम्। कमलाक्षिमन्तञ्च प्रोक्तम्। तथा चेदृशैः विशेषणैर्विशिष्टः परमात्मेति श्रुतिषु प्रतिपादितः। तथा चास्मिन् प्रतिपाद्ये विषये कस्य कस्य कथं कथं संगतिरित्येतस्मिन् विषये सम्प्रति विचाराणां विधास्यामः।

ननु व्यासार्जुनादिष्वपि 'कृष्णः' इति शब्दो वर्तते एव तथा सति कथमेवं वक्तुं शक्यते? इति जिज्ञासायामत्र तत्समाधानार्थं कृष्णशब्दमाह-

'कृषिर्भूवाचकः शब्दो णश्चनिर्वृत्तिवाचकः' इति।। (लघुमञ्जुषा -4)

तथा च तत्रह फ्ब्रह्मस्वरूपम्य् इति। अर्थात् ब्रह्मभूतो यो वर्तते कृष्णस्तस्यैव ग्रहणमत्र कृतं वर्तते। अतः इतराः शब्दाः अत्र नैव विभावनीयाः। परन्तु अख 'ब्रह्म' इत्ययं शब्दोऽपि 'विधिः, वेदः' इत्येवमादिषु बहुषु अर्थेषु वर्तते, तथा च कथमेवं वक्मतुं शक्यं यदत्र तस्य ईश्वरस्वरूपस्यैव तस्य ग्रहणं कृतं वर्तते, न तु वेदादिषु यो ब्रह्म इति शब्दो वर्तते, तस्य ग्रहणं कृतम् इति। तथा च तस्याः जिज्ञासायाः सामधानं कुर्वन् प्राह यत् फ् परम्य् इति। तथा च तस्मिन् विशेषणे प्रदत्ते सति न भवति अपरत्र अतिव्याप्तिः। तथा च किं नाम परत्वम्? इत्यस्याम् आकाङ्क्षायाम् तत्रेच्यते यत् फ्परं क्षराक्षराभ्याम् उत्कृष्टम्य् इति। अर्थात् क्षरादक्षराच्च तत्त्वद्वयाह यदुत्कृष्टं वर्तते, तदेवात्र पर शब्देन बोध्यम्।

तथा चैतद्विषये विवृण्वन् प्राह यत् क्रमसूत्रं व्याख्यातम्, इदानीं लक्षणसूत्रदीन्यन्यानि व्याचक्षाणो भगवत्पदार्थाभिन्नं ब्रह्मपदार्थमाह निर्वचनमुखेन फ्स्वभावतय् इति। तथा च पस्वभावतोऽपास्त-समस्तदोषम्य् इति। अर्थात् स्वभावेन एव अनादिप्रकृत्यैव अपास्ताः निरस्ताः समस्ताः सर्वे दोषाः यस्मात् तमे, फ्स्वभावतोऽपास्त-समस्तदोषम्य् इति। ते के दोषाः? इति जिज्ञासायामाह यत् 'अविद्यास्मितारागद्वेषाभिनवेशा' इति। पातञ्जलसूत्रत् क्लेशाख्याः पञ्चा त एव मतोतोहमहामोहतामिस्तान्धतामिस्रशब्दाभिधेयाः। तत्र स्वरूपवारकं तमः, देहाद्यहंबुद्धिः मोहः, भोगेच्छा- महामोहः, क्रोधस्तामिस्रः, अतन्नाशे स्वनाशबुद्धिरन्धतामिस्रः । जन्मास्तित्ववृद्धि-परिमाणापक्षयमरणात्मका विकाराः षड्विधाः। सत्त्वरजस्तमांसि प्राकृतगुणास्तत्कार्यभूताश्चानन्ता बद्धक्षेत्रज्ञधर्मा, एतेषामत्यन्ता-भावाश्रयत्वम् इत्यर्थः' इति।।

अर्थात् योगसूत्रदिषु प्रतिपादितैः समस्तैरपि दोषैः रहितो वर्तते परमात्मा। तत्र 'अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशः' इत्येते वर्तन्ते च दोषाः। इतोऽपि तेषामेव द्वितीयं नाम 'तमः, मोहः, महामोहः, तामिस्रं, अन्धतामिस्रः' इति। तत्र यत् स्वरूपस्य वारणं करोति तदेव 'तमः' इति शब्देन व्यवह्रियते। इतोऽपि आत्मानं विसृज्य देहे एवाहंबुद्धिः इति 'मोहः' इत्यनेन शब्देन व्यवहियते। तथा च क्रोधस्तामिस्रशब्देन व्यवह्रियते। इतोऽपि भोगस्य इच्छा तावत् 'महामोहः' इत्यनेन शब्देन व्यवह्रियते। तन्नाशाभावेऽपि स्वनाशस्य या बुद्धिः सा 'अन्धतामिस्रः' इत्यनेन शब्देन व्यवह्रियते। तथा चैतैः दोषैः रहितो यो वर्तते, स एव परमात्मेति कथ्यते।

ननु यदि परमात्मा एवं रूपता स्वीकर्तुं शक्यते, चेद् ब्रह्मणो निर्गुणत्वमेव समायाति। तथा चतादृशं निर्गुणत्वं साधयता भवता तावत् स्वस्य 'सगुणं ब्रह्म' इत्यस्य सिद्धान्तस्य त्वदुक्तस्य तु भङ्गत्वमेव साधितं भवता। तथा चेदं तु तव न युक्तम् ? तथा चैवं रूपेण कृतायां शङ्कायां प्राह 'अशेषकल्याणगुणैकराशिम्' इति। अशेषाणाम्- समस्तानाम्, कल्याणानाम्- कल्याणात्मकानाम्, एकः-मुखः, राशिपुंजः, यः, तम् 'अशेषकल्याणगुणैकराशिम्' इति। तथा चात्रेदं प्रोक्तं यत् परमात्मा सकलानां कल्याणपूर्णानां गुणानामेकमात्रं पुञ्जः वर्तते। तथा चेदृशानां गुणानां समाश्रयत्वात् निर्गुणः परमात्मेति नैव शक्यते वक्तुम्, अपितु सगुणत्वं तस्यायाति। यद्यपि तस्य निर्गुणत्वमपि वर्तते एव, तथाऽपि तस्य अर्थान्तरं वर्तते। तथा च फ्निर्गुणम्य् इत्यस्य 'दुष्टगुणत्वाभावः' इत्यर्थः। इदानीमेवं प्रतिपादिते गुणाः के? इति जिज्ञासा तु जायते एव तथा च तस्मिन् कृते प्रोक्तं यत्तु गुणाश्चज्ञानशक्तिबलैश्वर्यवीर्यतेजश्शौशील्यगल्सल्यार्जवसौहार्दसर्वशर ण्यत्वसौम्यत्वकारुण्य स्थिरत्वधैर्यत्वदपामाधुर्यमाद्दवादयः। तत्र ज्ञानं नाम सर्वदेशकालवस्तुविषयक- प्रत्यक्षानुभवरूपम्, शक्तिचाघटनघ-टनापटीयरूपेसामर्थ्यम्, बलं विश्वधारणशक्तिः, ऐश्वर्यं नियमनशक्तिः, वीर्यं श्रमहेतोरपरिमितत्वेऽपि श्रमशून्यत्वम्, तेजः परैरनभिभूयमानत्वे सति पराभिभवनसामर्थ्यम्। एते षट्द्भगवच्छब्दवाच्यः। सुशीलत्वं जात्यादिमहत्त्वमनपेक्ष्यातिमन्दैरप्यमायया संश्लेषभावत्वम्। वात्सल्यं भृत्ये दोषाननुसन्धानत्वम्, मार्दवम् आश्रितदुःखसहीष्णुत्वम्, आर्जवं मनोवाक्कायैः, समत्वम्, सौहार्द्द आत्मशक्तिमनतिक्रम्यपररक्षणोद्यमः, सर्वशरण्यं ब्रह्मादिस्थावरान्तैः साधारणोपायत्वम्। तदेव सौम्यत्वमपि कारुण्यं परदोषक्षपणस्वभावः, स्थिरत्वं युद्धादावचलत्वम्, धैर्यत्वं प्रतिज्ञापालनत्वम्, दया निर्हेतुकधरदुःखाहुः खित्वेसति तन्निराचि-कीर्षा, माधुर्यम् अमृतपानवत् स्वाददर्शित्वमित्यादयः स्वाभाविका अनन्ताश्च, सौशील्यादयस्तु भगवदाश्रयणे आश्रितरक्षणे चोपयोगिनः इति विवेकः। तथा चैवं रूपेण समस्तानां कल्याणगुणानां समाश्रयत्वेन प्रपिश्चतो भवति परमात्मा। तथा चैवं रूपंण पूर्वोक्तं विहाय पुनः कीदृशम् इति जिज्ञासायां प्राह 'व्यूहाङ्ङ्गिनम्' इति। तत्र व्यूह इति शब्दो व्यूहावतारस्य इतोऽपि अन्येऽपि येऽवताराः तेषामपि उपलक्षणमर्यादया बोधकं वर्तते। तथा च व्यूहाश्चान्येऽवताराश्च अङ्गानि यस्य च 'व्यूहाङ्गिनम्' इति। तथा च व्यूहावताराः चत्वारः 'वासुदेवः, प्रद्युम्नः, अनिरुद्धः, प्रद्युम्नः' इति। तथा चान्येऽपि केशवादयोद्वादश अवताराः विद्यन्ते।

अवतारास्तावत् त्रिविधाः वर्तन्ते 'गुणावतारः, पुरुषावतारः, लीलावतारः' इति। तथा च –

1. गुणावतारः- गुणानां नियन्तृत्वेन तदभिमानिदेवकालादिभिः सृष्ट्यादिकर्तारो ब्रह्मविष्णुरुद्रास्त्रिविधाः गुणावताराः।
2. पुरुषावतारः एतेऽपि त्रिधाः। आद्यो महत्सृष्ट्या प्रकृतिनियन्ता-कारणार्णपशायी, द्वितीयस्तावत् गर्भोदशायी समष्ट्यान्तर्यामी, तृतीयस्तावत् क्षीरोदशायी भारतीयदर्शनस्य परिशीलनम् डा रमाशंकरत्रिपाठी, भारतीयविद्यासंस्थान, वाराणसी, प्रथम-संस्करण, वि-सं-2057
3. लीलावतारः- लीलावतारामपि आवेश स्वरूपभेदेन द्विविधाः ।। तत्रवेशोऽपि द्विविधः । स्वांशावेशः, शक्त्यंशवेशश्च। तत्र स्वांशो नरनारायणादिरूपः।शक्त्यंशवेशोऽपि प्रभवविभवसंज्ञकेन द्विविधः। तत्रद्याः धन्वन्तरिपरशुरामादयः, द्वितीयः कपिलऋषभचतुःसनार-दव्यासादिरूपः। पूर्णश्च नृसिंहो दाशरथी रामः श्रीकृष्णश्चेति विवेकः। एवं पूर्णत्वमुक्ताः। तथा चैवंविधाः सर्वेऽपि अवताराः सृष्ट्यादीनां कार्याणि चालयन्ति। तथा च।

**संदर्भ-ग्रन्थसची**

1-ब्रह्मसूत्रभाष्यम्-स्वामीयोगीन्द्रानन्दमन्त्री,उदासीनसंस्कृतविद्यालय, दुण्डि-राज वाराणसी 1982 षड्दर्शनप्रकाशनप्रतिष्ठान,
2- वेदांतरत्नमञ्जूषा – श्री कृष्णा प्रिंटिंग, प्रेस वृन्दावन (विक्रमा. २००५)
3- वेदांतरत्नमञ्जूषा – श्रीभगत्पुरूषोत्तम् आचार्यः
4-लघुमञ्जूषा – श्री पंडित ढुण्ढिराज शास्त्री वैष्णवविदुषामनुचरः, चौखम्बा संस्कृत – सीरीज
5-ब्रह्मसूत्रभाष्यम्- जवाहरनगर, दिल्ली द्वितीय संस्करणस्य, 1986
6-वेदान्तपारिजातसौरभम्
7-भारतीयदर्शनम् आचार्यबलदेवउपाध्यायः, चौखम्बा, औरियन्टालिया वाराणसी, 1984